QP Code: CMN-02

# कर्नाटकसंस्कृतविश्वविद्यालयः

## सर्टिफिकेट्-परीक्षाः - २०२५

## हस्तप्रतिशास्त्रम्

### पत्रिका -२, विषयः - लिपिशास्त्रम् (Elements of Palaeography)

**Total No. of Questions: 49** **Total No. Of Printed Pages: 4**

**Date: 16.11.2025** **Time: 2.30 A.M to 5.00 P.M** **Max Marks: 80**

**I. अधोलिखितानां बहुविकल्पात्मकानां सर्वेषां प्रश्नानां समीचीनमुत्तरं चित्वा लिखन्तु ।**

Pick correct answers for the below given questions (attempt all) 40x1=40

१. अक्षराणां प्रयोगद्वारा कालनिर्णयप्रकारः किं नाम्ना ज्ञायते?

अ) रोमन् संख्या पद्धतिः आ) कटपयादिक्रमः इ) अङ्कपद्धतिः ई) संख्याक्रमः

२. खरोष्ठिधम्मपद मातृकायाः अपरं नाम किम्?

अ) बवर् मातृका आ) प्राकृत-धम्मपद मातृका इ) भक्षाली मातृका ई) जैनमातृका

३. सम्पादनार्थम् आवश्यकानां सामग्रीणाम् एकत्रीकरणं किमुच्यते?

अ) परिष्कारः आ) सामग्रीसङ्कलनम् इ) विभागः ई) चयनम्

४. एकत्रीकृतानां प्रतीनाम् पठनात्पूर्वं सम्पादकेन किं कर्तव्यम्?

अ) दोषपरिष्कारः आ) संज्ञाकरणम् इ) चयनम् ई) विमर्शा

५. लब्धानां हस्तप्रतीनां शाखाः, मूलं, मिश्रणमित्यादीनि कस्य सज्जीकरणेन ज्ञायन्ते?

अ) वंशवृक्षस्य आ) पुस्तकस्य इ) व्याख्यानस्य ई) विमर्शस्य

६. अत्र लेखकदोषं चिनुत।

अ) वमनम् आ) योजनम् इ) प्रक्षेपः ई) एतत्सर्वम्

७. लिपिकारेण लेखने योजितः मूलाद्भिन्नभागः किमुच्यते?

अ) वमनम् आ) द्विरुक्तिः इ) प्रक्षेपः ई) पुनरुक्तिः

८. “प्रतिग्रह” इति लेखने “प्रग्रहः” इति लिख्यते चेत् कः दोषः भवति?

अ) अक्षरलोपः आ) पुनरुक्तिः इ) द्विरुक्तिः ई) प्रक्षेपः

९. “दर्शयिष्यते” इति स्थाने “प्रदर्शयिष्यते” इति लिख्यते चेत् कः दोषः भवति?

अ) स्थानान्तरणम् आ) वमनम् इ) योजनम् ई) पुनरुक्तिः

१०. ग्रन्थारम्भे ग्रन्थान्ते वा लभ्यमानः ग्रन्थपरिचाय्यकः भागः किं नाम्ना ज्ञायते?

अ) पुष्पिका आ) पद्यम् इ) आवरणम् ई) गद्यम्

११. “ज्ञाने न चान्यो” इति लेखने “ज्ञाने च नान्यो” इति लिखिते किमुच्यते?

अ) प्रक्षेपः आ) योजनम् इ) पुनरुक्तिः ई) स्थानविपर्ययः

१२. सम्पादकस्य आद्यं कार्यं किं भवति?

अ) सामग्रीसङ्कलनम् आ) ग्रन्थचयनम् इ) वंशवृक्षनिर्णयः ई) दोषपरिष्कारः

१३. सम्पादनावसरे लब्धा एकैव प्रतिः किं नाम्ना ज्ञायते?

अ) मातृका आ) एकलामातृका इ) प्रतिः ई) मूलप्रतिः

१४. खरोष्ठिधम्मपद मातृका कस्यां लिखिता प्राप्यते?

अ) भूर्जपत्रे आ) तालपत्रे इ) कर्गजपत्रे ई) ताम्रपत्रे

१५. भक्षाली हस्तप्रतिः अधुना कुत्र वर्तते?

अ) ORI, मैसूरु आ) बोड्लियन् ग्रन्थालये इ) अड्यार् ग्रन्थालये ई) BORI

१६. भक्षाली हस्तप्रतिः केन सम्पादिता?

अ) जि.आर्. काये आ) आर्. शामाशास्त्रिणः इ) रेवा प्रसाद द्विवेदिनः ई) कुप्पुस्वामिशास्त्रिणः

१७. “बवर्” मातृका कति पत्रात्मिका लब्धा?

अ) २० आ) ३० इ) ४० ई) ५६

१८. तुर्फान् मातृकायाः सम्पादकः कः?

अ) वेबर् आ) शामाशास्त्रिणः इ) वि. राघवन् ई) लूडर्

१९. “भूत”शब्दः कां संख्यां निरूपयति?

अ) १ आ) २ इ) ६ ई) ५

२०. “रत्न” शब्दः कां संख्यां निरूपयति?

अ) ४ आ) ६ इ) ७ ई) ९

२१. “सिद्धम्” लिपेः १४ अक्षराणि कस्यां मातृकायां लिखितानि प्राप्तानि?

अ) होरियुजि आ) बवर् इ) वेबर् ई) भक्षाली

२२. “सागर” शब्दः कां संख्यां निरूपयति?

अ) ९ आ) ७ इ) ५ ई) ३

२३. बाह्यसाक्ष्यसामग्र्याः इदमेकम् उदाहरणम्।

अ) मूलप्रतिः आ) व्याख्यानानि इ) एकला मातृका ई) एतत्सर्वम्

२४. “चम्पूभारतम्” इति लेखने “चम्पूभारम्” इति लिखितो लेखकदोषः कः?

अ) प्रक्षेपः आ) पुनरुक्तिः इ) अक्षरसंयोगः ई) अक्षरलोपः

२५. अन्तःसाक्ष्यसामग्र्याः इदमेकम् उदाहरणम्-

अ) एकला मातृका आ) उद्धृतिः इ) भाषान्तरे अनुवादाः ई) व्याख्यानानि

२६. मातृकाणां क, ख, ग, दे, शा इत्यादि रूपेण नामनिर्देशक्रमस्य किमुच्यते?

अ) वंशनिर्णयः आ) प्रतिलेखनम् इ) संज्ञाकरणम् ई) ग्रन्थवरणम्

२७. ग्रन्थस्य विस्तृततया विवरणोपेता ग्रन्थसूची किं नाम्ना ज्ञायते?

अ) लेखकग्रन्थसूची आ) विमर्शात्मकग्रन्थसूची इ) पत्रसूची ई) ऐतिहासिकग्रन्थसूची

२८. "केटलोगस् केटलोगरम्" केन निर्मितम्?

अ) थियोडर् आफ्रिच् आ) लुडर् इ) कील्होर्न् ई) वेबर्

२९. ग्रन्थसम्पादने उपलब्धानां पाठानां व्यवस्थितरूपेण एकत्रोल्लेखनस्तरः कः?

अ) पाठान्तरसङ्कलनम् आ) ग्रन्थवरणम् इ) वंशनिर्णयः ई) संज्ञाकरणम्

३०. हस्तप्रतिसूच्यां विद्यमानानि अंशानि चिनुत।

अ) क्रमसंख्या आ) ग्रन्थनाम इ) स्थितिः ई) एतत्सर्वम्

३१. "प्रज्ञापारमितहृदयसूत्रं" कस्यां मातृकायां लब्धम्?

अ) होरियुजि आ) वेबर् इ) बवर् ई) गिल्गिट्

३२. "व्यवस्थितम्" इत्यस्य स्थाने "व्यवहितम्" इति लिखिते कः दोषः भवति?

अ) योजनम् आ) अक्षरलोपः इ) पदविपर्ययः ई) वमनम्

३३. "अवतारः" इति पदेन का संख्या उच्यते?

अ) १ आ) ८ इ) १० ई) ९

३४. पुष्पिकायां एते विषयाः भवन्ति -

अ) ग्रन्थस्य नाम आ) कर्तुः नाम इ) ग्रन्थस्य कालः ई) अ,आ,इ- एतत् सर्वम्

३५. "भावविवेकः" इति लेखने "भाविवेकः" इति लिखिते को दोषः?

अ) द्वितीयसमानाक्षरलोपः आ) स्थानविपर्ययः इ) आगमः ई) योजनम्

३६. सम्पादनावसरे शारदालिप्यां विद्यमानां हस्तप्रतिं देवनागरीलिप्यां लिखिते किमित्युच्यते?

अ) भाषान्तरणम् आ) प्रतिलिपिकरणम् इ) वाचनम् ई) लिप्यन्तरकरणम्

३७. भक्षाली हस्तप्रतेः कालः कः इति ऊहितः?

अ) १०म शतमानम् आ) ६ शतमानम् इ) २ शतमानम्२ ई) १२ शतमानम्

३८. भक्षाली हस्तप्रतेः विषयः कः?

अ) आयुर्वेदः आ) ज्यौतिषम् इ) काव्यम् ई) गणितम्

३९. ग्रन्थालये ग्रन्थानाम् अन्वेषणार्थं सौलभ्याय च निर्मीयमाणा पट्टिका का?

अ) ग्रन्थक्रमः आ) ग्रन्थसूची इ) पुष्पिका ई) भूमिका

४०. एतेषु सम्पादकस्य लक्षणं किम्?

अ) शास्त्रवित् आ) मेधावी इ) वाक्पटुः ई) एतत्सर्वम्

**II. अधोलिखितेषु प्रश्नेषु चतुर्णां लघुनिबन्धात्मकम् उत्तरं लिखत ।**

**Answer the following questions with a short notes (any four) 4x5=20**

१. पाठान्तरसङ्कलनं कथं क्रियते?

२. हस्तप्रतिषु संख्यानिर्णयक्रमः कथं भवतीति निरूपयत।

३. ग्रन्थसम्पादने पुष्पिकायाः महत्त्वं किम्?

४. NCC नाम किम्? किं तस्य महत्त्वम्?

५. अक्षरलोपः, प्रक्षेपः, अक्षरागमः, स्थानविपर्ययः इत्येतेषां लेखकदोषान् निरूपयत।

६. ग्रन्थसूचीप्रभेदान् विलिखत ।

**III. अधोलिखितेषु द्वयोः प्रश्नयोः उत्तरं निबन्धरूपेण लिखत ।**

**Answer the following questions in an essay form (any two) 2x10=20**

१. ग्रन्थसम्पादनक्रमः लेखनीयः ।

२. ग्रन्थसूचीनिर्माणक्रमः लेखनीयः ।

३. प्रसिद्धानां चतुर्णां हस्तप्रतीनां विषये निरूपयत ।

* * * * *